श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ वक्षःस्थलावस्थानस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वक्षःस्थलावस्थानस्तबकः ॥

श्रये शेषाचलमणेः शार्ङ्गिणो हृदयङ्गमाम्।
अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम्॥ १॥

कल्याण दिव्य करुणादि गुणाम्बुराशे
  काङ्क्षाधिकाभ्युदयदायिकटाक्षलेशे।
भद्राय दैत्यजिदुरःकृतनित्यवासे
  भक्तिस्थिरेण मनसा भवतीमुपासे॥ २॥

नालीकसम्भवभवादिसुराभिवन्द्ये
  नानाविधाकृतक वाङ्मय मौळिवेद्ये।
पाथोधिपुत्रि पतिवक्षसि नित्यहृद्ये
  भान्तीमनन्यशरणो भवतीं प्रपद्ये॥ ३॥

शय्यागृहं तव पिता जगतां नियन्तुः
  भ्राता दृगेक इतरः पुनरङ्गभूषा।
वक्षस्यमुष्य वरदे त्वमवस्थिता तत्
  वाल्लभ्यमम्ब भवदीयमनन्यलभ्यम्॥ ४॥

भ्रातुर्विधोर्वसुसमृद्ध्यसहेषु पद्मे-
  ष्वास्ते रमेत्यपयशः प्रशमाय नूनम्।
सोदर्यकौस्तुभशुभावहमब्धिकन्ये
  वक्षस्त्वमावससि वेङ्कटनायकस्य॥ ५॥

भगवतः प्रतिघो हृदि मा स्म भूत्
  समुदयद्वृजिनेषु जनेष्विति।
अवहिता जगदम्ब हिताय नो
  हृदयमेव हरेरधितिष्ठसि॥ ६॥

www.prapatti.com

फणिशैलपतेस्त्वमिन्दिरे
भवसि प्राणसमेति साम्प्रतम्।
अमुना भवती यतः स्वयं
हृदये प्राणपदे निवेशिता॥ ७॥

उरगाद्रिपतेरुरःस्थलस्था
कमले तद्गलशङ्खगर्भमुक्तैः।
शुचिहारमहः सुरस्रवन्ती
सलिलैरम्ब सदाऽभिषिच्यसे त्वम्॥ ८॥

कुमारि क्षीराब्धेः कुसुमसुकुमाराङ्गि भवती
नवं पद्मं सद्म म्रदिम रमणीयं विजहती।
शरण्ये त्रातुं नः शरकिणघनं कौस्तुभशिला-
कठोरं गाढोरः श्रयसि कृपया कैटभरिपोः॥ ९॥

श्रीवत्साङ्कं चिरतरमुरः सीमगोष्ठं मुरारेः
अध्यासीनामनघहरितोदारकान्त्याभिरामम्।
कल्याणि त्वां सुलभममृतं संश्रितानां दुहानां
क्षीराम्भोधेः समुदितवतीं ब्रूमहे कामधेनुम्॥ १०॥

विश्वातीतो जयति वृजिनह्रासदे वासुदेवः
पद्मे तस्याप्युपरि महिमा भासते तावकीनः।
क्षेत्रज्ञानां हृदयमनिशं कञ्जनाभोऽधिशेते
तस्यापि त्वं हृदि हृततमोराजसे राजसे यत्॥ ११॥

वीक्षन्ते ये वेङ्कटक्ष्माभृदिन्दोः
सूरस्थाने शोभमानामिह त्वाम्।
दुग्धोदन्वत्पुत्रि दिव्यं पदं ते
सूरस्थानं हन्त भित्वा विशन्ति॥ १२॥

बलिवसुमुषः प्रहर्षा-
दुच्चोरस्थलमुपेत्य कमले त्वम्।

अस्माकमपथगानां
　　हरसे चिरकालसञ्चितानर्थान्॥ १३॥

शशिलेखा भवती च
　　श्रीरब्धेरुद्गते तयोराद्या।
धारयति कृष्णमन्तः
　　कृष्णेनान्तस्तु धार्यते चरमा॥ १४॥

वनमालाया मुषितां
　　विश्वविभोर्भुजतमालविटपान्तः।
कामपि कनकलतां त्वां
　　कलशाकूपारकन्यके मन्ये॥ १५॥

परमतुलसीतमनघे
　　वनमालाप्तं सुलक्ष्मणाकलितम्।
कलयसि सद्रूपयुतं
　　कमले वक्षो हरेर्महारामम्॥ १६॥

दृष्टात्मप्रतिबिम्बितेषु मणिषु द्रागिन्दिरे मा स्म भूत्
　　अन्तःस्थेष्वबलान्तरस्थितिधिया कोपस्तवेत्यच्युतः।
शङ्कोन्मेषकथापथातिपतितं सन्त्यक्तरत्नान्तरः
　　तं त्वत्सोदरमेव कौस्तुभमणिं धत्ते भुजाभ्यन्तरे॥ १७॥

सस्नेहपूर्तिरुदितत्रिदशोपसेवः
　　दीपो हरेरुरसि देवि तवेष्टगेहे।
अस्माकमान्तरतमः प्रशमय्य मुक्तेः
　　मार्गं प्रकाशयतु कौस्तुभरत्नदीपः॥ १८॥

सरसिजनिलयापि वैभवेन
　　स्फुरसि निरेनसि मानसे मुनीनाम्।
उरसि मुररिपोरुपोढहारे
　　शिरसि च देवि गिरां पुरातनीनाम्॥ १९॥

www.prapatti.com

शुभश्रीवत्साङ्कं शुचिरुचिरहारं मुररिपोः
    तमालाभं वक्षस्तरलवनमालासुरभिलम्।
परिष्कुर्वाणां त्वां भवजलधिशोषाय कलये
    जगन्मातः प्रातस्तनजलजदायादवदनाम्॥ २० ॥

प्राचीनवाक्परिषदां परतत्त्वचिन्तां
    व्यालेन्द्रभूधरपतिर्व्यपनेतुकामः।
कान्तो बिभर्ति भवतीं कलशाब्धिकन्ये
    भूषाविशेषमिव देवि भुजान्तराले॥ २१ ॥

स्वभावादुन्मीलद्बकुलसुमनः कोमलतनोः
    तव क्लेशाशङ्काकुलितहृदयेनापि हरिणा।
त्वदाक्रान्ते हन्त व्युदसितुमुरस्यम्ब पुलका
    न शक्यन्ते पद्मे न खलु सुलभः कण्टकजयः॥ २२ ॥

निरत्ययं नीलमहोनिधानं
    कान्तं मुकुन्दाभिधमिन्दिरे त्वम्।
निरञ्जनैरेव जनैर्गृहीतं
    वीक्ष्य स्थिता वक्षसि रक्षितुं किम्॥ २३ ॥

जननि पुष्यसि तामरसं पदं
    वितनुषे च नतामरसंपदम्।
परमुरस्स्फुरणप्रतिरोधिनं
    परमुरः स्फुरणं नयसेऽद्भुतम्॥ २४ ॥

यदि नाम विष्णुवक्षः
    क्षणमत्यक्षः क्षमामयि रमे त्वम्।
आगस्विनस्तदा नो
    नैवारक्षिष्यदुष्मलो नाथः॥ २५ ॥

हृदये कमलदलाक्षि
    त्वत्पदलाक्षीयलक्ष्म भवतीं च।



www.prapatti.com

दधदूष्मलोऽपि कृष्णो-
ऽप्यधिकारुण्यं वहत्यहिगिरीशः ॥ २६ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे वक्षःस्थलावस्थानस्तबकः ॥

www.prapatti.com